M2434

कविकुलगुरू कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M2434 विषय दर्शन

नाव श्रीरसमंजरी प्रकाश

लेखक/लिपीकार जगन्नाथ

पृष्ठ 66 काळ पूर्ण/अपूर्ण

M2434

M

M-2434

॥ श्रीरसमंजरीप्रकाशप्रारंभपत्रमिदम् ॥ श्रीरस्तु ॥

(82)

श्रीगणपतये नमः॥ अमारां [illegible] ति [illegible] ति॥ आद्यमादेन्चमुक्तर [illegible] तथा [illegible] यद्दे

प्रथमपातेन सा। तरोरेव। नतस्य [illegible] नतु फलपुष्पाणि वा। एकपुष्पावचयस्ततो [illegible] माना [illegible] तेना

वेन प्रेमातिशयः। पुष्पावचयश्चतद्भू [illegible] तत्स्पृहणीयितस्यां गृहीतुं प्रवृत्तायां स्वयमेवाहृ [illegible] तिस्प

तृतीयपादे कामिन्याः कोमलांगतया शंका। अंतर्विद्यमानपेभ्णः रसेमास्वादेनालसां। अनेन ना [illegible]

॥ १॥ प्यनुरागो दर्शितः। अंतः प्रेमरसालसइतिपाठे अंतः प्रेमरसालसोप्येवं चकारेति प्रेमा [illegible] तीयो [illegible] ति॥

विद्वदिति। रविणा विकास्यमानां मंजरी यथा भृंगस्य रसास्वादाय भवति तथेयमपी [illegible] हुः॥ तन्तु [illegible]

लप्रकाशे पि मंजरीत्रका शाकल्यस्यकविकुलक्षुण्णत्वाभावा चिंत्यमित्याहुः॥ ॥ अभ्यर्हित [illegible]

नमाश्रयत्वाल्लक्ष्यत्वाञ्च॥ तदालंबनेतरस्य च पुरुषोत्तमालंबनविभावत्वेनेत्यर्थः॥ एतेन नायकस्यो [illegible]

त्वान्नायिकायाः प्रथमतो निरूपणमित्यपाहुः॥ तत्र स्वामिनीति॥ स्वामी चात्र परिणी [illegible] एवकारेण तद् [illegible]

कानानुरक्तत्वंच अनुरागयोग्यतावच्छेदकधर्मवत्त्वं॥ तेन मुग्धायां नाव्याप्तिः। वस्तुतो [illegible] भयप्रधान [illegible]

स्तस्या अप्यनुरागोस्त्येव। किंतु तत्प्रधानत्वादेवास्यं भवेषस्यन्यदेतत्। अनुरागपदेना [illegible] शृंगारस्था यिभ [illegible]

३४ बीजं चिंत्यमित्यपास्तं॥ पूर्वं रक्ता भवेन्नारी पुमान्पश्चात्तदिंगितैरितिक्रमानुसारेण तस्याः प्रथमतो निर [illegible]

वस्या।

रतिर्गृह्यते। तेनमात्राद्यनुरागमेवकारार्थो नास्तीतिपरास्तं। एवकारव्यावर्त्यमाह॥ नचेति। उभयानुसारीरागतवत्या

मव्याप्तिरित्यर्थः। नन्विष्टापत्तिरित्यत्राह॥ पतिव्रतायाएव लक्ष्यत्वात्। पत्यनुरागवत्सा एवेत्यर्थः। किंचास्याः

स्वीयात्वेपरसंबंधित्वे नपरकीयालक्षणस्यतत्रातिव्याप्तिरित्याह॥ तस्याश्चेति। एवंचस्वीयालक्षणे

एवकारंदत्वातस्याःपरकीयात्वमेववक्तुंयुक्तमितिभावः। वैपरीत्येतुसिद्धांतविरोधइतिभावः। व

स्तुतो॰व्याप्तिरितिपाठः। तादृश्याःस्वीयात्वंमन्यमानस्यशंकेतिध्येयं॥ शीलंसद्वृत्तं। आर्जवंअकुटिल

ता। गतागतेति। क्वरणकुंचनविषयककौतुकं। अपांगोनेत्रप्रांतं। मन्मथेअकुलत्वत्वेन कादाचित्कत्वं

यज्यते। तदपिनायकमनोविकारपर्यंतमेवेतिभावः। अधरएवेतितमुल्लंघ्यबहिर्नप्रसरति। अने

नचशीलसंरक्षणं। श्रुतेरेव। नश्रवणयोः॥ अतिथिस्येनकादाचित्कत्वमतिप्रियत्वं वा॥ यद्वा॥ अ

ना तिथेर्मानापमानयोःसमानत्ववत्त्वविषयकार्यानुष्ठानानुनेष्ठानयोःसमत्वेनक्षमावत्त्वंव्यज्य

तेइति। नास्त्येवसः यदिभवेत्तदाक्रमःआरंभएव। नपरिपोषः तस्मान्नस्येवनबहिस्तद्ध्वंजिकाचेष्टे

तिऋजुत्वंध्वन्यते॥ २॥ तत्रांकुरितेति। अंकुरितत्वेन प्रसरत्वं लक्ष्यते। पश्यति स्मितानुन रागिवे

२ सतिप्रसग्गयोनास्तंमुग्धात्वं। सत्यंतनांकुरितयौवनसामान्यवनितादिषुनातिव्याप्तिः। साचेति। नज्ञातंयौवनं
ययेतिव्युत्पस्याइतिवाविग्रहः। एवमपरत्र। ययेत्येवंसपरे। ज्ञायमानत्वादिविशेषितमुग्धालक्षणेनैवेन
योर्लक्षणंबोध्यं। सैवेति। सातातज्ञातयौवनामुग्धैव। क्रमशः पूर्वलज्जैव। ततोनायकदर्शनस्पर्शनेभय
मितिभावः॥ पराधीनेति। लज्जाभयाभ्यांपराधीनातत्प्रधानानतुतद्विरोधेनस्वकार्यक्षमेतिभावः। एवंच
लज्जाभयपराधीनरतिकत्वेसतिज्ञायमानत्वादिघटितंमुग्धालक्षणंअस्यालक्षणंसैवनवोढा। अथ
येविश्वासः क्रियेति। सलज्जव्यापारकरणान्मनोवशीकृत्य। क्रियाविषयलज्जयेत्यक्षरार्थः। मार्दवमल्पा
पनेयता। आज्ञप्तमिति। मदनेनराज्ञाएयीदृशासनौवस्तु आज्ञप्तंतारुण्यंवास्तुविधिंविधास्यतीति
हेतोर्हस्यादिभिस्तदाम्रंच्यतइत्यन्वयः॥ अत्रराजत्वेनानुल्लंघनीयाज्ञत्वंदेवत्वेजेत्वता॥ कामत्वेन
कामिनीतनुभूमावस्थानयोग्यताचध्वन्यते॥ तनौहर्म्याभिन्नेशरीरेइत्यर्थः। हर्म्यालेनान्येषांदु
र्गमत्वं। खंजनचातुरीनीलकटाक्षविक्षेपरीतिमत्त्वं॥ यद्वा॥ सयथानिधिमदृशायोगञ्शालीतथाउ २
णवदेकांतविषयशालित्वं। एतेनैणीदृस्पाष्टनैवदैर्घ्यचापल्ययोलीभादिदंगतार्थमित्यपास्तं। यद्वा॥

खंजरीटस्य समयविशेषसंचारवत्कादाचित्कत्वेन सल्लज्जव्यापारापेनोहरत्वं। सोधाधरीऐं द्वी। तेन सर्वदाप्रस
न्नतया कोपाभाववत्त्वं। कठोरत्वाभावे नाल्पापनेयता वा। सुधेति। जीवनदातृत्वं। समुद्रपदेन सन्मयी दत्त्वं।
लहरीपदेन प्रतिक्षणविलक्षणारसवत्त्वं। अत्र लहरीपदेन नवनवसमीहा व्यज्यत इत्याहुः ॥४॥ नीराजनीर
मिति॥ तटभुप। तटसमीपं प्राप्तानलुतटं। तेनाकस्मिकतथाविधशंकाकवलितहृदयतया आर्द्रवसनत्याग
शाटीपरीधानादिज्ञानशून्यता व्यज्यते। श्रोत्रे किमुत्पलं लग्नमिति ज्ञातुं स्फुरन्नेत्रयोः श्रवणयोः सीम्नि क
रं न्यस्यतीत्यन्वय इति केचित्॥ तत्र अन्यत्र लग्नत्वशंका। अन्यत्र करस्पर्श इति वैयधिकरण्यापत्तेः
तस्मात् श्रोत्रे स्फुरत् शोभायमानं। अनेन श्रोत्रसीमासंबंधयोग्यता या संशयो चित्यं। इदमुत्पलं श्रवण
योर्नेत्रयोः सीम्नि लग्नं जलक्रीडावशात्संबंधमापन्नं किमिति ज्ञातुमित्यन्वयः। करमित्येकवचनेनैक
करस्यैव तथा व्यापारेण संभ्रमातिशयः। पूर्वमेते वैयधिकरण्यमप्येतत्सोषायैवेत्याहुः। केचित्तु श्रो
त्रे विद्यमानं स्फुरन्नेत्रयोः सीम्नि किं लग्नमिति श्रवणयोः करं न्यस्यतीत्याहुः। इयं च शंका जले प्रतिबिंबं
दृष्ट्वा जातेति बोध्यं॥ प्रोंछतीति। अर्थात् परेण करेणेति बोध्यं। मुहुरिति सर्वत्रान्वेति। सख्या उत्तरे दत्तेपि
मुग्धत्वात्स्व पुनःपुनः प्रश्नः ॥५॥

 

स्वयंभूरिति॥ स्वयंभूः न तु नायककरवर्द्धितः। शंभुः सुखजनकः शिवश्च। पयो न धरतीति विग्रहः तेन न वि
३ रोधः पयोधरपदे स्यस्तने रूढत्वात् क्वापि न विरोधसंभावना॥ कस्य धन्यस्य नखेन चंद्ररेखा चंद्रः स चूडायां
चूडुकेयस्य तादृशो भविष्यति। अत्रेदृशासखी प्रश्नेनैव पृच्छमानाया ज्ञातयोनात्वं गम्यते। यद्वा। कस्ये
तिसखीप्रश्नः धन्यस्येति नायिकोत्तरं। यद्वा॥ करकलितकमलेन स्वकुचसाम्यं संपाद्य पश्यंतीं नायि
कां प्रति कमलापेक्षया व्यतिरेकबोधकं सखीवाक्यमित्याहुः॥ पयोधरो भविष्यति कस्यापि धन्य
स्य नखेन चंद्रचूडो भविष्यतीत्यन्वयः॥ ६॥ हस्तौ नूनिति॥ हस्ते न संचले। न केवलं तावन्मात्रं। शयनेन
तदुपांते। न केवलं तावदेव। क्रोडे भुजाभ्यंतरे। तेन निर्गमायोग्यत्वं। बहिःस्थापसरणात्। यतत
इति लिखितात् दविरामो ध्वन्यते॥ लज्जाभयाधिक्येन विश्वासलेशाभाव इति भावः॥ करेणातदेकदे
शांगुल्यादिना दिना भूतलादौ स्थिरयितुमित्यर्थः॥ ७॥ दरमुकुलितेति॥ दरमुकुलितत्वं लज्जया मीषर
या॥ नीवी कद्यंशुकग्रंथिः सैव नीवीमूलधनं। नारीकव्यंशुकग्रंथ्यो नीवीमूलधनेपि चेति विश्वः॥ ३

तेनातिसंरक्षणीयत्वं। नियमिततत्वेनदुरैष्येहरत्वं। बंधपदंदृढत्वव्यंजकंतेनापिदुष्परिहार्यत्वं। करेणाधीद
परेण। एकवचनेनतयोर्निरंतरत्वं। स्थूलपदेनसकलहस्तदेशव्यापकत्वेनपुष्टत्वं। कस्य भाग्यदशा। लिनः
।ईदृशानवोढास्वापएवदुर्लभः किंपुनस्तेलाभइतिभावः।५। समानेति॥ समबलतयोपरूढपरस्पर
त्वंसमानत्वं। मुग्धातिप्रसंगवारणाय लज्जामदनेत्युभयं। प्रगल्भायामतिवारणाय समानेति। सो
चमातृनाधिका। अतिविश्रब्धेति। तस्याधाष्ट्यीभावान्मध्यात्वं चेत्यं। सर्वथातस्याधाष्ट्यीभावत्वे
प्रमाणाभावात्त्वप्याहुः। अगोपराधः॥ स्वापेति॥ प्रियस्य। नतुपत्युः। तेनविलोकनस्यावश्यकत्वे
हानिरेव॥ तेनैतत्कालिकप्रियाननदर्शनस्यदुर्लभत्वं। हानिपदेनासह्यता॥ करग्रहणंरत्यर्थं॥ प्रि
यत्वेनानिषेध्यता॥ तथाचलज्जाहानिस्वरूपा। निष्टलाभः॥ प्रेपदे अनिष्टद्वयस्तीतिजन्यसंतापव्या
कुलावध्वेत्यर्थः॥ एतन्नेष्टोदाहरणं। इष्टोदाहरणंत्वन्यत्रद्रष्टव्यं॥७॥ पतिमात्रेति॥ इदंवि
शेषणंस्वीयात्वसामान्यलक्षणालब्धमेवानूद्यते। तस्यकृत्यमाह॥ वेश्यायामिति। वेश्यायांसामान्यवनि
तायांकुलटायांपरकीयोपलक्षकमेतदित्याहुः॥ रतौभोगे॥ प्रीतिर्मुग्धामध्यापेक्षया। धिके[illegible]स्यर्थः॥

२ स्त्री लिंगत्वापेक्षया विरोधः। २

४ संमोहो ऽन्तानं। अस्यास्ति तस्य तदद्वयमिति विशेषः। तथा च प्रगल्भाद्विविधा। रतिमती। आनंदसंमोहवती चे

त्यर्थः। चेष्टापरतया योजनं प्रथमं यथेत्यादिग्रंथः स्वरसविरुद्धः। संसज्यति। अतिशये नामर्दयेत्यर्थः। स्ता

नमिसेकवचनेन पीनतातिशयो नैरंतर्यं च। आकलय्य। स्वमुखेन चुंबनार्थं संयोज्य। अंबराकर्षणे तिम्ल

शतया लज्जाविरहः। तेन रतिप्रीतिर्व्यज्यते। क्षुदस्य। उत्क्षिप्य। एवं बाह्यरतेन नायिकानुरक्तिं तां कृत्वा अं

तरतैः रे प्रतिबंधकस्य सूर्योदयं जिज्ञासमाने प्रियेऽस्या यन्त्रयः। यद्वा। पद्मिन्या रात्रिरतस्याह्लादकत्वा

भावेन दिवारते भवत था तस्य कामशास्त्रसिद्धत्वेन सूर्योदयं जिज्ञासमाने सति सूर्योदये न दिवा मैथु

नं कुर्यादिति निषेधादिति विरतिं करिष्यतीति भावास्तानीलोत्पलं नीलकमलं रविप्रकाश्यं निन्हुते गो

पायतीत्यर्थः। अत्रोत्पलपदस्य चंद्रविकासि न्येवशक्तेश्चिंत्यमेतत्। वस्तुतो नीलोत्पलं नीलकुमुदं।

वसनांचले निन्हुते गोपायतीत्यर्थः। तेन तन्मुकुलीभावद्वारा सूर्योदयानुमाननिरासः। यद्वा।

मुकुलीकरोतीत्यत्र तात्पर्यं। तेन च सूर्योऽनुदित इति ज्ञापयंतीत्यर्थः स्यात्। १०। नखक्षतेति। रतांत ४

समयेरतांतो त्तरेसमये। रतांतः सम्यगितोजातोयस्मिन्निति मुखत्तेः। मयेस्यनेन ममेदृशीगतिर्निवती
नां लुगतिं न जानेरति॥ इतरनायिकापेक्षयास्वस्मिन्व्यतिरेको व्यज्यते॥ तदपिदृष्टमेवसामान्यतोन
त्विदमितिविशिष्यज्ञातमितिभावः॥ एवं च सतिस्मृतिः क्व। आभ्यन्तरतवैचित्र्यस्येति शेषः॥ प्रियत
व मदृशीन जनितानंदेनेति भावः। रतिः क्वचेति॥ रतिः नखक्षतादिरूपा बाह्यरतिः तत् अव्यवहि
तांतररतप्रसंगेक्व॥ सापि विस्मृतेति भावः। एवं चालितवशिक्षाविधेः दूरापास्तं स्मरणमिति भावः॥
केचित्तु यदुक्तं रतिसमये इदं न दृष्टमिति तदेवोपपादयति॥ रतिः क्वेत्यादिना॥ स्मृतिरत्यो विरोधादि
तिभावइत्याहुः॥ ११॥ धीराधीरेति। एकत्र धैर्याधैर्यकार्यदर्शनेन धीरत्वाधीरत्वे विरुद्धे इति न शंक्यं॥
अत्र स्वीयामध्यालक्षणघटितव्यंग्यमात्रकोधप्रादुर्भावकत्वं मध्याधीरात्वं॥ एवमुत्तरत्रापि॥ अवं
गः स्फुटः गीरितिशब्दस्यार्थः॥ इदमुपलक्षणं चेष्टाया अपि॥ शब्दोप्यपरुषएव॥ अधीरायाः प
रुषवागित्युक्तेः॥ अत्र परुषवागित्यस्य कोपप्रकाशिकेति शेषः॥ इदं रुदितस्याप्युपलक्षणं। वचन
रुदिते। वचनमपरुषं वक्रोक्तिरूपं॥ रुदितं परुषवचसउपलक्षणं॥ प्रौढाधीराया स्थिति॥

५ अत्रचेष्टाप्रदर्शनेनतदुदितंलक्षणमपिदर्शितमेवेतिनन्यूनता।धीरादिभेदइति॥ इदमुपलक्षणं।मुग्धामुग्धादि
भेदाअपिस्वीयायाएवंस्वस्याज्ञामात्रमितिध्येयं॥ दृश्यतेहिमालतीमुग्धापरकीयाचेति॥ लोलाली
ति॥ भवदंगसौरभलोभेनचपलभिलिसमूहयुते।यद्वा॥ लोलस्त्वदागमनकांक्षयाचपलःअलीनांस
नायिकासखीनांतत्सखीनामेववासमूहोयस्मिन्।तेनातित्वरितगमनाक्रमातिशयः।नायकसंबो
धनाकरणेनकोपातिशयः।निकुंजे।लतापिहितप्रदेशे॥ तेनजनानवलोकनीयतयानिःशंकबहल
केलिविधानात्स्वेदातिशयः।भवतुइत्येकवचनेनानादरः।देहेतस्यपराधीनत्वेननिरपराधत्वात्।ननु
त्वयि।नलिनीदलेन।तस्यशीतलत्वात्॥ तालेनव्यजनेनेतिवानोक्तं।जारवृत्तांतवतोनायिकासंबंधि
पदार्थदानस्यैवोचितत्वात्॥ १२॥ जातरति॥ आगरःमदन्यनायिकारतिवशात्॥ शोणिमा।तद्सह
नजन्यामर्षेण।आघूर्णितंभ्रांतं।तेनैवश्रीफलंबिल्वफलंतत्सदृशंमदन्यस्याःकुचलक्षणं।यद्वा। च ३
श्रियस्तदीययौवनसंपत्त्यादेःफलंसंभोगरूपं।एवंचकामनिकेतनायास्तस्याःफलंत्वयागृही
तं।तत्क्रोधेनकामोमांप्रहरतीतिचित्रं।चौरस्यैवताडनोचितत्वादिभावः॥ यद्वा॥ मदनस्यकुसुम
ति।

सायकृतयास्वयंफलंलब्धा॰ इंकुसुमैः प्रतारितेति भावः। ग्राम्यदुंगधेनेत्यनेन तस्या अनेकानुरागित्वं।
इदमेव पूर्वोदाहरणे लोलालिपुंजेत्यस्य। १३। कांतानुरागेति॥ कांतानिष्ठस्य विषयकानुरागोत्साद नं
चतुरोसि॥ ननु प्रियानिष्ठेत्यादि। पद्य॥ कांतानुप्रिया। अनुरागेजनयितव्ये चतुरोसि। अनुराग
वती मांदृष्ट्वाकार्यकारितया॰ ननुरक्तांकरोषीतिकाकाव क्रोतिरियं॥ नकेवलं तदनुरंजकं चातुर्य
मात्रं किंत्वन्यदपीत्याह॥ मनोहरइत्यादिना॥ योग्यइत्यनेनानुरक्तायामपि अनुरागेनवहसीति विप
रीतं। लक्षणया॰ योग्योसीतिपरुषवागभिव्यज्यते। नाथोसीतिपाठेप्रभुरसि नकिंचिदकर्तुं योग्यमिति
भावः। ननु प्रियोसीतितात्पर्यं। नवयौवनेति। ननु श्रुतिविनयादिभूषितोऽसीतितात्पर्यम्॥ प्रिय
स्य। प्राक्प्रियत्वेनाभिमतस्येत्यर्थः॥१४॥ कांतानायिकामाह॥ नोतल्पमिति। परिजनक्रोधप्रका
शछलादितिसर्वक्रियास्वन्वेति। इत्थंपरिजनक्रोधप्रकाशछलेन तल्पभजनाभावादिभिः सह
चरी। सर्वदिक्सांनिध्यशालिनी सखी॥ साचिवक्रीतग्रीवं।।१५॥ प्रतिफलमिति॥ प्रतिबिं
बमित्यर्थः॥ अचलकन्यासिनलडत्वं॥ अविचार्यकारित्वंच॥ कंपेति। कंपचंचलकंकणप्रसर्प
कांतिस्त्राजाकरेणेति स्यनेन नानाविधमणिमरीचिनिचयसारवरकंकणगणकायावलकरज

६

न्यतया तर्जनस्याति सीतिप्रदर्शनं ॥ १६ ॥ तल्पोपांतं नतु तल्पमुपेयुषि । प्राप्तवतिन तूपविष्टे । तेनदूरतो दर्शनेनैव तत्कृतापराधस्मृतिर्व्यज्यते ॥ मयीयं कुपितेति भियाव्याकुलाक्षा । टितिरक्तुमना क्याका । कुर्ध्वे निर्विकारव तीवाकू यस्य ताद्दृशी सती । साचितिर्यग्भूत्वा कथमसौ सापराधोपि वाच लतया स्नानमनपराधमिव द शयतीति विस्मयेन यदुसितं तेन न तु रोषेण स्फूर्जंती अतिशयिता कपोलश्री र्यस्यास्तया ततो हासेन प्रसादमनुमायहस्तन्यस्तकरे सति । प्रोष्ठीशफरी ॥ लाक्षारसक्षालितलोहिनारुण्याति शायः ॥ क्षालि तं लिप्तमित्यर्थः ॥ तादृशा शफरी प्रोष्ठकिरशावन्मांसला अतिशयितारुचो यासां रस्यर्थः ॥ अत्र प्रोष्ठी पदेन चंचलत्वं कठिनत्वं च प्रोष्ठपदेन सत्सापराधोपि प्रणामादिमंतरेणैव करग्रहणं करोतीति । अ रुणचंचलकठिनदृष्टिपातः ॥ १७ ॥ धीराज्येष्ठेत्यादि ॥ इदमपि प्राचीनानुरोधेनैव । अधिकेति ॥ अ धिकं च सपत्न्यंतरापेक्षया । एकस्मिन् शयन इति ॥ काचित्सखी प्रतिवदति । हे सखि सदक्षिण नायकः कोपवशात्स्वानपेक्षितत्वे नैकस्मिं छयने सुप्तयोर्नायिकयोर्नायकः कृततुल्यापराधतया

६

संजातमैत्रीकत्वादिति भावः ॥ निद्रां विज्ञाय नायकस्य दर्शनं मा भूदिति धिया पल्लवितः आपादतलमस्तकं वि
स्तारितः अवकुंठनपटः प्रच्छादनपटो यया तामकांडदेमेव कोपचिन्हं । पल्लवितपदेन तदीयकरस्पर्शास
हिष्णुत्वं । तेन चरतावौदासिन्यं उत्कंधरः उद्ग्रीवः नतु क्षितः कदाचिदियं द्रक्ष्यतीति भिया इति भावः ॥ दृष्टवान् ॥
तदीयनिद्रानिर्णयायेत्तः अन्यस्या निकटं प्राप्य निभृतं गुप्तं ॥ तदीयोत्तरवसनांतरितया व्यालोलाच्च
लितया हस्तांगुल्या यो नायककरयोगात् ॥ अंगुल्यो न तु हस्तः कंकणरणत्कारेण कनिष्ठायाः स्वापच्यु
तिर्माभूदिति धिया इत्यर्थः ॥ तासां व्यापारैः पुनः पुनर्नायककर्तृकचालनैः एकव्यापारेण स्वापच्युता
वपि नेत्रोन्मीलनं नाकरोदिति पुनः पुनस्तत्करणं ॥ तेन रत्युदासीनत्वं ध्वनितं । पल्लविताव कुंठन
पटामिति अस्या अपि विशेषणं विभक्तिभेदेनेत्याहुः ॥ एवंभूततदीयहस्तांगुलिव्यापारैस्तदीय
वसनप्रांतं न तु वसनं । आकस्मिकवसनाकर्षणसंभ्रमो मा भूदिति चपलयन् न तु कर्षन् तथा सत्य
धिक एव कोपः स्यात् ॥ यद्वा ॥ स्वीयैः स्वहस्तांगुलिव्यापारैस्तद्वस्त्रप्रांतं चपलयन् इत्यर्थः । कृतवान् ॥
अकार्षित् ॥ रिरंसयेति भावः ॥ एवं चक्रीडौत्सुक्याभावात्पूर्वा द्वैन्यून स्निहतया कनिष्ठा उत्तरार्द्धे

क्रीडेत्सुख्या ऽज्येष्ठा त्वं ॥ १८ ॥ अंतरिति ॥ कषायितेकलुषीकृते प्रियतमे ज्येष्ठापेक्षया अन्यस्याः प्रियतम
७ त्वाभावेपि नायिकांतरापेक्षया प्रेमातिशयवत्त्वात्तमप् ॥ यद्वा ॥ प्रियतमेइ तिकानन विशेषणं ॥
पश्यन् । तर्जन ताडनादिना कोपं प्रत्यक्षमिवाकलयन् । तयोरेकांस्वत एव नायकं प्रतिकोपाढ्यं पुष्पा
वचयाय तन्मिषेण नम्रवदनां घनेकानने अंतर्धानेकानन मध्ये समायोजयन् ॥ प्रसादनादिपूर्वकं
प्रेरयन्नित्यर्थः ॥ निबिडवन मध्यप्रविष्टायानकिमपि स्वनरितंइ दं ज्ञात्वैमिनि बुध्यतेतिभावः ॥ ये
त्वंतः कोपकषायितेत्येकपदेन व्याचक्षते । तेषामधीरत्व प्रतीतिश्चिंत्या ॥ अर्द्धोन्मीलितनेत्रयोर्ये
षांत चमत्कारास्तदृत्रमास्तेरमणीयवदनवंती कथमियमनेनप्रतारितारितेति विस्मयात्स्मेरः
स्मितवान् । अधरस्याऽर्द्ध अर्द्धाधर सपल्लवोयस्यास्तां । अनेनसलज्जत्वं ॥ स्मेराऽर्द्धेतिपाठेस्मे ७
रेणार्द्धः तेनस्मितस्य सुधारूपता ॥ यद्वा । स्मेरः आर्द्रश्चाधर पल्लवोयस्यास्त्यर्थः । तत्रार्द्रप
देन सुधाद्रवरूपत्व मधरे व्यज्यते इत्याकूः ॥ १७ ॥ धैर्याधैर्येति । धैर्याधैर्यांगीकारागृहत्रीलयो
र्मृगदृशोः प्रीतये रत्नद्वंद्वं मुष्टिद्वयेस्थापितवान् । परंतु प्रथमतः आदौ एकस्याः कनिष्ठायाहस्तेरत्नं

कलयन् ग्राहयन् परस्याऽन्येष्वायाः हस्ताहस्तियुद्धमिषेणक्रीडायामपि पिढे युत्त्वारोपः। सपत्नीतारणाय मु
ष्टि पदं नशीघ्रग्रहणयोग्यत्वं तेन विरतहस्तव्यापारध्वनिः ॥२०॥ अप्रकटेति। अप्रकटत्वं अस्फुटत्वं। त
च्च विदग्धजनमात्रवेद्यत्वं। अस्फुटेत्युक्त्या सामान्यवनितायां नातिव्याप्तिः। परपदोपादानान्मुग्धायां।
नापि मध्यायां। भयमिति। पराधीनं मदनाधीनं॥ यद्वा। स्वभ्राद्यधीनं। पराधीनत्वं च स्वेच्छाविषयकाप्रवृ
त्तिमत्त्वं। किमपि॥ प्राणवियोगरूपं। यद्वा। मे चेतः किमपि पराधीनं वस्तु सख्यधीनं वस्तु परपुरुषभोगरूपं
कर्तुं मृगयते इत्यर्थः ॥२१॥ गुप्तेत्यादि। सुरतगोपनकर्तृत्वं गुप्तात्वं॥ पुंश्चलीभावनिपुणत्वं विदग्धात्वं॥
जारसमूहगामित्वं कुटिलात्वं। इष्टहानिजनितानुतापवत्त्वं अनुशयानात्वं। इतिप्रभृतीनामेतादृशीना
मन्यासामपीत्यर्थः॥ श्वश्रूरिति॥ हे सखि। संखित्वेन स्वचरितगोपनाहिता। श्वश्रूपदेन तत्कृतकोपसहन
योग्यत्वं। सुहृदो मित्राणि। तत्तद्वचनाकरणमेव क्रोधादिनये हेतुः॥ स्वापाभावे कारणमाह। आखोरिति॥
आखोरे कले नोद्गुन बाहुल्यं व्यज्यते। आक्रमणाय हननाय कोणकुहरात्। अंधतमसग्रस्तगृहसंकीर्ण
वयवात्। तेन जागरो वस्छायां विद्यमानाया अपि मार्जीयादर्शनायोग्यत्वं। उत्फालं उड्डानं। आतन्वती विस्ता

८

तेनोड्डानबाहुल्यं। नखक्षतबाहुल्यं। मार्जारीतिस्त्रीलिंगेनपरपुरुषकरस्पर्शोपिनास्तीतिस्वस्मिन्सतीत्वं।
तेनगुप्तपरपुरुषानुरागोध्वन्यते॥ कांकांअनिर्वचनीयांपूर्वमहानात्वापकरणे न मार्जारीत्येतेयमवस्थे
तिवृत्तगोपनं। पुनरपिश्वश्र्वादिनियोगेनकरिष्यामित्येदियमेवावस्थेतिवर्त्तिष्यमाणतद्गोपनं॥ तृतीयोप्या
र्थे समाजग्रस्तइतिबोध्यं॥ अर्थसमाजग्रस्तत्वादेवतृतीयोत्तेदएवनास्तीत्यप्याकुः॥२२॥ निबिडेति॥
हेपथिकपांथत्वेनवासस्थानकथनयोग्यताव्यज्यते॥ मार्गेतरवर्त्तिनदीतीरनिवासयोग्यत्वंच॥ तीव्रे
सवितरि मध्याह्ने। तेनजनसंचारशून्यतयासंतापकत्वेनमार्गेतरस्यानौचित्यंव्यज्यते॥ निबिडाउत्त
मायेतमालाः तान्चल्लुंतेवेष्टयंतीतितमालवल्लिन्यः ताश्चतावल्ल्योलताश्च॥ मल्लिवल्लीतिपाठे मल्लुंतेशो
कि संते ताश्चताः वल्ल्यश्चेत्यर्थः। ताश्चविचैलाः मल्लीप्रसूनानितेषांपङ्क्त्याविराजितसमीपदेशोसरित्तटे
इत्यर्थः। तेनान्यजनानवलोकनीयत्वं॥ अतिशयोद्दीपकत्वंशीलत्वं॥ संतापहरत्वंचव्यंजयति॥ तत्रत्र
सिद्धं॥ तेनकेनपथागंतव्यमितिसंदेहोनविधेयइतिभावः॥ तेनतदेवसंकेतस्थानमितिव्यज्यते॥२३॥
दास्यायेति॥ भवननाथेनतुस्वनाथेनवाप्रियेवदरीस्थचौर्यरतस्थानभूतां अपनेतुंछेत्तुंआदिशति। स्व ८

संकेतनिकेतभंगभिया कुठारं पयसि क्षिपति। एवं च कुठाराभावात्तन्नतच्छेदनं। गवेषयन्नपि कुठारं दासोऽन
लेन संभावयेत्॥ संभाव्यापि वा नीतिभिया तोयेन करं प्रक्षिपेत्। तत्कालालाभे कार्यांतरेण स्मृतिरेव वा
स्यादिति भावः॥२४॥ लक्षिता। विदग्धविदितपरपुरुषानुरागा इत्यर्थः। काचित्स्वसखीं स्वनिवारण
कारिणीं अन्यत्र तद्दोषकारिणीं प्रत्याह॥ यद्भूतमिति॥ जातस्यावश्यं भाविनश्च निवर्त्तित्वाभावादिति
भावः। पूर्वार्द्धस्य। नन्वेवं सत्यनिष्टं स्यादत आह॥ यद्भवतीति॥ कोपि अनिर्वचनीयः। गोपीति पाठे श्रीकृ
ष्णस्य गोपीं प्रति वचनं॥२५॥ एतेदयोपकारित्वाभिमानिनः। अंभोधराः अनुपयोगि सारधारकाः
वारिकणान् अस्मदनुपयोगिनः। अप्रार्थिता अपि जलं त्यजंति। न प्रार्थितं पुरुषसमुदायं इति भावः।
एवमग्रेपि॥ पुरुषा इति॥ उपभोगक्षमत्वं व्यज्यते। एवं चानुपकार्यंभोधरस्तुत्या विधेरपि निंदा व्यंग्या॥
त्वगद्दलं तृणं। नायकान्॥ चातुर्यादिगुणशालिनः। त्रैलोक्ये इत्यनेन स्वःस्थितकल्पवृक्षा अपि॥ अस्म
दभिलषितसंपादने कथं भ्रम इति व्यज्यते। कातरं रूपणं। किं कुत्सितं। मेघादीनामिष्टसंपादकत्वं।
उद्दीपनरूपानिष्टजनकत्वेनेति भावः॥२६॥ समुपागतेति॥ अनुकंप्या लता लतिका॥ तालीदले
ति। संकेतभंगपीडयेति भावः॥२७॥ काचित्प्रियवसतिं नीयमाना तत्र चौर्यरतसंकेतनिकेतनाभाव

शंकाव्याकुलां नायिकामाह ॥ निद्रालुकेकीति। अनेन जनसंचारशून्यत्वं। तेन च सुरतयोग्यत्वं। मिथुनपदेन
तयोः परस्परविरहासहिष्णुत्वं। तेन च विविधोद्दीपनशालित्वं। तेन च नानाविधसुरतौचित्यं च ध्वन्यते। पा
रावतश्रेणिरुक्तिः कंपितनवतरुकिसलयायेषु तानि ॥ अनेन नानाविधचपलविलासिवत्ता ध्वन्यते इत्या
कूः। वस्तुतस्तु अनेनापि निर्जनत्वमेव। प्रियतमे[illegible]स्येति गोपनाय आयात अयमेव त्वां तादृशेषु क्रीडयि
ष्यतीति भाव इत्याकूः ॥२८॥ कर्णेति ॥ कर्णावतंसिताम्रमंजरीपिंगलीकृतकपोलः। कर्णकल्पितेत्यने
न त्वदुक्तं केवलं श्रवणयोग्यमेव न त्वनुभवयोग्यमिति ध्वन्यते। रसलक्षेन स्पृहणीयत्वं। निःपतदि
त्यादिना रुदितं निरीक्षणयोः संतन्यमानता ॥ संकेतिततरुतलगमनज्ञापकमंजरीदर्शनेन मयैव त
त्र न गतमिति विषादेन रोदनं ॥ धारापदेन दुःखातिशयः। मुदितेति ॥ नायकलाभसंभावनादितज्ज
न्यानंदवतीत्यर्थः। काचिद्दस्तखी नायिकासविधे पांथं वक्ति ॥ गोष्ठीष्विति ॥ बहुवचनेन चिरकाल
मप्रत्यावृत्तिः। तस्य [illegible]तुल्यता चावेद्यते [illegible]ष्यति सर्वदेति रोषणत्वेनातिपीडितायामस्यां अनुग्रहौचित्यं ॥
बधिरेति। बधिरस्य प्रायो मूकत्वात् दृष्टमपि न वक्तुं शक्यमिति भावः ॥ नेत्रद्वयस्य च वाक्श्रवणस्य च ॥ इत्थं

क०

तरुणी सुता। अत्र तरुणीत्येनेन संकेतितनायेस्यातिस्पृहणीयत्वं॥ सादरश्रवणार्थेन निशम्येत्येनेन संके
तितनायकस्यातिप्रियत्वं। कुचौ कुंभाविव करिगंडाविवेत्येनेन अतिकठिनत्वं तयोः सीम्नि परिसरे
रोमांचाः कंचुकमिव उद्दंचितं निबिडं रमणीयं वा विस्तृतं जातं। कंचुकपदेन नैबिड्यं तेन हर्षातिशयः॥
स्वतः कठिनयोरपि कुचयोः कंचुकरणेन विचित्रोद्भूतसुरतप्रियत्वं अभिव्यज्यते॥ ३०॥ किंचिदिति। ति
र्यग्वलनादिति। किंचित्सदंचसविधजनस्य स्वाकूतज्ञानं मा भूदिति। हारत्वेन चित्ताकर्षकत्वं। सरले
ति॥ अकुटिलेत्यर्थः॥ कन्यकात्वादेव तेन सस्पृहावलोकनीयत्वं। अन्यापदेशेन तिर्यक्कुस्मितं यत्र। तथा
कांतस्य दृष्टिमार्गादपसरणे भ्रांतयोर्भ्रांता विलोचनद्युतिर्यत्र। वक्रग्रीवाकरणादेव भुजायां पर्यस्तं सब
हुं नेत्रोत्पलं यत्र। अत्र स्मितगोपनेन ज्योत्स्नायां नागंतव्यमिति। भ्रांतभ्रांतेत्येनेनान्यानवलोकि
तमागच्छेरिति भुजापर्यस्तेत्येनेन कदापि भुजायां त्वत्करकमलसंयोगो भविष्यतीत्यालिंगनौत्सुक्यं।
कर्णस्य कंडूयनमित्येनेन बहुमानेन नागंतव्यमिति। त्वद्वचनामृतपात्रतास्य भवत्विति वा। गंड
स्येति पाठे मत्कपोले त्वया स्वकरेण पत्रावलीरचनीयेति व्यंग्यं। नृपकन्यकेति दुष्प्रापत्वं। यमालो
कते सस्पृहमिति भावः। अत्र वस्तुना नायकस्य मदनुरक्तेयमिति प्रतीतिरूपवस्तुध्वनिः॥ ३१॥

१० चित्तमात्रेति ॥ इत्तेतरानुपाधित्वे सति तदुपाधिकानुरागवतीत्यर्थः ॥ परकीयाया अपि कदाचित्तोपाधिकानुरागस
त्त्वात्सत्यंतं ॥ अनुरक्तायमिति ॥ सौंदर्यादिगुणोपाधिनेति शेषः ॥ महर्षोविति ॥ अदातरीत्यर्थ ॥४॥ चित्तमात्रे
मेवेति ॥ नसौंदर्यादीत्यर्थः ॥ वस्तुतः सामान्यवनितात्वं कालिकाव्याप्यवृत्तिर्हि ॥ यावद्धनोपाधिकानुराग
स्तावत्तत्वं ॥ चिरपरिचयोत्तरं सौंदर्यादिनानुरागे तु नास्त्येव तत्वं किंतु परकीयात्वमेव ॥ तदीयानुरागस्य विद
ग्धमात्रवेद्यतया न परकीयालक्षणाव्याप्तिः ॥ इह्यैवेति ॥ आभ्यागत्यं नवाकारित्वं ॥ तेन स्वतः प्रवृत्तयाबहु त ५
धनदातृत्वं ॥ तेन हर्षातिशयः ॥ इहैवेति नलुस्येद्धेति ॥ तेन दर्शनमात्रेयातादृशावस्थेति धनलुब्धत्वं वक्षो
जत्वेनांतरंगलात्तेन च नायिकासुखसाधनसमयमेव हर्षयोगता ॥ अन्योन्यमिति समानहर्षता ॥ आ
श्लेषमालिंगनं हारादिजातसित्संभावनयेति ॥ तदुत्तद्दूत्यनेन चिरकालस्थायित्वं ॥ तेन हर्षातिशयः ॥४॥ कुं
तलपदेन कामिमनोजेतृत्वं ॥ मालेत्यनेन कामिकत्वं ॥ पर्याप्तीत्यनेन कामिहृदयमदनानलोपशाम
कीलता ॥ चिरकालेन ममापि भूषणलाभो भविष्यतीति आनंदाश्रु ॥ नायिकागतश्च हर्षजन्याति
शयसंभ्रमो ध्वन्यते ॥ अत्र तद्दर्शनानंदेन गात्रस्फुरणे सह सैव स्तनसंपर्के आश्लेषो द्रष्टव्यः ॥ स्वाभि १०
लाषप्रकटनाय शिरसि चैलांचलदानेकरादिसंपर्केणांगयष्टिकंपेन वा पुष्पिस्युतिः ॥४॥ कर्णविश्रांत

नेत्रकटाक्षविलोकनेन गमनोत्प्रेक्षे स्मा॥२२॥ रताइति। स्वीयापरकीयासामान्याइत्यर्थः। अन्यस्याःसंभो
गःस्वनामकेनदुःखिताइत्यर्थः। तेनस्वनायकीयनायकांतरसंभोगज्ञानजन्यदुःखवत्वंतल्लक्षणं। वा
क्रोक्तिगर्विताबक्रोक्तिव्यंग्यगर्ववतीत्यर्थः। गर्वश्चप्रेमविषयकःसौंदर्यविषयोवा। उक्तिविशेषप्रकटितस्वग
र्ववत्वंलक्षणं॥ नायकानयनायप्रेषितांतेनप्रभुक्तांदूतीमाह॥ त्वंदूतीति। अनेनसत्यभाषणायोग्यत्वंस
वेदनानभिज्ञत्वंस्वकार्यकरणप्रवणत्वंवाव्यनक्ति। कुंजं। तेनविविधमदनोद्दीपनशीलत्वं। पापीयसः
निर्दयस्य। अधमदूतीसंभोगकर्तुरित्य॥ किंशुकंपलाशकुसुमं। तदाकारेण नखक्षतंच॥२३॥ नचेयंखं
डितैवेतिवाच्यं। प्रियांगसंगिकामिन्यंतरलक्षणदर्शनसंजातखेदाखंडिता। स्वप्रियसंभोगलक्षण
वत्कामिनीदर्शनसंजातदुःखेयमितिभेदात्॥ वपुषीति॥ तनुःशरीरंनयनेचतयोरंतरं तौ व्यवधानं
तेनभीरुःतवप्रभुर्निशिभुग्नः तववपुषिरत्नंभूषांतनोति। यद्विस्वतोनशोभतेतस्यैवभूषायुक्ता
नत्वन्यस्येतिभावः। अतएववपुषीत्युक्तंत्वंधन्यतमासि। आपाततोहमधन्येतिवक्रोक्त्याहमेव
धन्यात्वमधन्यैवेतिव्यतिरेकोव्यज्यते॥२४॥ कलयति विचारयति॥ एवंचैतादृशविचारमात्र
कारिण्येतादृशकोपःकिंपुनस्तथावक्तरीतिव्यज्यते॥ निरूपमानयोरक्ष्णोःकमलस्योपमानत्वेन

कल्पनाकुशलात् त्वत्तोनदंडाहित्वं सुधारसस्येति। तेन माधुर्यातिशयः साम्यं द्योतयति। पूर्ववदेवव्यंग्यत्वं के
तेवराकेमत्त्वस्य नवचनयोरूपमानत्व लप्स्येते॥ विपरीतं तु युक्तमिति भावः॥ इष्टत्रापकर्षापादनकारित्वात् सखि
किमाचरामि किं करोमि विधेयं तदुपदिश्यतेत्यर्थः॥ आस्तां वा तावदेतत्सहित्वं तेव। तदीयताद्दशविचारसहनत्व
मेवदोषः। सर्वत्रगुणारूपायाअपितस्याअत्रदोषत्वमितिचित्रमिति भावः॥ ३५॥ प्रियापराधेति॥ ए
वं च प्रियापराधज्ञापकचेष्टागम्यकोपवत्त्वं लक्षणं। गोत्रस्खलनेति॥ सपत्नीनामोच्चारणमित्यर्थः॥
अन्यथेति। अकारांतरसिद्धकुतूहलायनोद्यतइत्यर्थः। अन्यथावादअपमानोद्बोक्तिः। अन्यां पश्यतिआला
लापं कुर्वत्यपि सति नायके सति। हेरगतोदरि॥ अनेनोदरमध्येपि मानस्यावस्थानस्थलं नास्तीति ध्वन्य
ते॥ भूषयतीतिपाठेऽलं कुर्वत्यपीत्यर्थः। न केवलं विलोकनकारित्वं। अपितु अलंकरणकारित्वमपि॥
महदपराधकारणं तद्वेसत्यपियदीयमवस्थानं हि किं वक्तव्यमवलोकनमात्रेइति भावः। क्वचित्त्विछि
लंक्वचित्कंटकितं। न मानस्य पददानस्थानं स्थलं नास्तीति ध्वन्यते॥ सागस्यपि प्रियस्यानुरागेणास्व
तादिविर्व्याप्तितवांगे मानस्य पददानार्थमपि स्थानं नास्तीति भावः॥ अन्यथासिद्धकुतूहलायपनेय
त्वं स्फुटम्॥ ३६॥ सद्योगोत्रस्खलनकुपितां नायिकां सांत्वयितुमाह। यद्गोत्रेति॥ यद्गोत्रस्खल

लनं लसत्सपत्नी नाम्नो ग्रहणं तत्र भ्रमः तदीयनामभ्रमः कारणमित्यर्थः। यद्येतन्न मन्यसे मद्वचनमस
त्यं मन्यसे चेत्तर्हि रोमालिरूपसर्पस्पर्शं कारयेति। रोमालिपदेन श्यामत्वं तेन विषयातिशयः। तेन दुः
स्पर्शत्वं। व्यालपदेन साहजिकक्रूरत्वं कारयेति स्वस्य पराधीनतां व्यंजयति॥२७॥ पिंजरं पिंगं उत्तानरत
करणेन चरणसंपर्कादिति भावः। यद्वा। तदीयमानापनयनाय नमस्कारे शिरश्चरणसंयोगादिति भा
वः। पिंगटमित्येव पाठो युक्तः। अलक्तकपीतत्वाभावात् पिंजरमित्ययुक्तमिति केचित्। श्रुतिमुक्ताः क
र्णोपांतप्रेरिताः कोपवक्रनिरीक्षणादिति भावः। नयनस्य प्रियं प्रति प्रेरितस्य कोणाभासः प्रांत
दीप्तयः कटाक्षदीप्तय इति यावत्। तिर्यग्विलोकने एकस्यैव प्रेक्षासंबंधान्नयनस्येत्येकवचनं॥
शिखरं पक्वदाडिमबीजाभं। माणिक्यं शिखरं मतं। कोपेनेति भावः। कोपाभासेति। ७ मुक्ताफलानि
तथा जानातीति भावः। यद्वा श्रुतिमुक्ताः नायकर्णमुक्ताः कुपितकामिनीनयनदीप्त्या रक्ता जाता
इत्यर्थः॥ एतेन चरणपातापनोद्यत्वं। पूर्वव्याख्यायां भूषणदानापनेयत्वं॥ २८॥ षोडशेति। मध्या
प्रगल्भयोः प्रत्येकं धीरादिभेदानां ज्येष्ठाकनिष्ठात्वेन द्वैविध्ये द्वादश मुग्धया केवं। एवं त्रयोदश
भेदवती स्वीया द्विधा परांगना सामान्यवनिता चेति षोडशेत्यर्थः॥ चतुरधिकारीतीति॥ एतत्र

नाधिकाव्यवच्छेदकं। किंतु गणनमात्रं। जातिकालवयोवस्थाभावं कंदर्पसायकैः। इत्यारोपसंख्या
तो नोक्ता विस्तरभीतितः। इति प्राचीनोक्तेरन्येषामपि सत्वादित्याहुः। अवस्थाभेदेनेति। कालिकावस्थ
यैवेत्यर्थः। एवकारेण जात्यादिभेदव्युदासः। हेत्वसिद्धिमात्रांस्याह। तातीति। उपलक्षणमेतद्दे
शादीनां। अनंतनायकानां जातिभेदभिन्नानां तत्रैवोपष्टंभकांतरमाह। तथेति। यदि जात्यादिभेदेन नो
यिकानंत्यं स्यात्तर्हि तथा तद्देवनायकानामपि दिव्यादिव्यभेदसंभवादानंत्यं स्यात्। एवं दिव्यादि
भेदेन अनंतानां खंडितत्वादिकं स्यात्। युक्तेस्तुल्यत्वात्। तस्माद्यथा प्राचीनैरनुदाहृतत्वान्नैतद्भे
दा नायकानां तथा नायिकानां जात्यादिभेदनिबंधनभेदवत्वं। वस्तुतो वात्स्यायनादिसंमतत्वाज्जा
त्यादिभेदाद्भेदो युक्त एव। आनंत्यं च व्यक्त्यानंत्यवददोषाय। यत्तु नायकानामपि खंडितत्वादिकं स्या
दित्युक्तं तन्नानौचित्याद्रसभंगापत्त्यापहारतं। प्राचामनुपन्यासस्तु न दिव्यादिभेदात्तावसाध
कः। अप्रयोजकत्वात्। अतएव जातिकालेत्यादि प्रागधायि। धीरादिभेदास्तावदिति। आदिप
दान्मानवत्त्यंत परिग्रहः। प्राचीनेति। वस्तुतो निर्युक्तिकत्वादयुक्तमिति भावः। दृशां

तरगतप्रियविरहसंतापवत्वं प्रोषितभर्तृकात्वं। दुःखं दीर्घतरमिति॥ अतिदीर्घं दुःखं वहंत्यपि अंबुज
मुखी सखीवर्गीयनोभाषते इत्यन्वयः। दीर्घतरले नानुल्लंघनीयत्वं॥ वहंतीति कठिनहृदयता मशक्यप्र
तीकारतां चय्यनक्ति॥ सखीति दुःखकथनयोग्यतां। वर्गस्तेन तन्निवारणासमर्थता। दुःखं विरहजं। अति वि
श्वासिसखीजनेप्यकथनेन लज्जातिशयः तेन मुग्धात्वं। तथा जलार्द्रनील्यास्तरणं त्यजत्यपि न निद्राति। ल
ज्जयेति भावः॥ कंठेन रसनायां दुःखवशेन तस्या जडत्वात्। परंतु दृशो बाष्पोदकं न दधाति। उदकपदेन
स्खगनानर्हत्वं। तेन स्खगनानर्हस्यापि स्खगनेन लज्जालुता ध्वन्यते॥ एवं विरहज्ञापकबाह्यचेष्टागो
पनेपि यत्नं येन प्रकारेण संतापं सहते तत् श्रोतोसवो वेद। चेतोभवपदेन दुःखज्ञानयोग्यता। अंतर्मदनते
ती वेति ध्वन्यते। कचित्तु वहतीत्यजत्यपि पाठः॥ ४७॥ वासरस्तदेवेति॥ तद्धदः पूर्वगृहीतार्थकाः तेष्वासा
र्दिगेह संबंधादखेदवत्ता असंभाविनीति व्यज्यते। वाचाल भृंगसुभगे। विरहपीडाजनकतया तद्वाचः
कुत्सितत्वेन तेषां वाचालत्वं। सुभगगीतकीर्तिवं सुरभौ वसंते॥ तेनोन्मादकत्वं व्यज्यते॥ अधिकंभ
सह्यं तेन परिहरणीयत्वं ताद्दशस्याप्यपरिहारेण लज्जावत्वं। किन्विदानमिति च स्खतोऽकथनासम्भ
करणेन तदेव द्रढयति। किंच सुरभिसमयाः पूर्वं लज्जापि व्यज्यते॥ ४८॥ मालतेति। पद्मदलमाला

विरहाद्दाहे कोमलकमलसंबंधेऽप्यालजालमेव स्यादिति भावेन तत्त्यागः। अनुक्षणं क्षीयमाणांगतया व
हनासामर्थ्येन हारादित्यागः। बालपदेन कोमलत्वं मुक्तं पद्मानां शीतलत्वेपि तत्त्यागेन स एव। यद्वा॥
भीरुत्वं तेन अस्था नो चित्यं। हरौ गते स्वाश्रय नायिकाशोनो वरयं भावी तु मालादिभिः रपि प्रस्थितमि
तिभावः। पाणिरहवलयं बाहुमूलं प्रयातीति पाठः यथास्थितपाठे बाहौ वलयासंभवेन तत्स्थानस्य
पाणिमूलागमनेपि विरहातिशयावगतीति संबद्धतैव। किमपि दृष्टं दृष्टमित्यर्थः॥४१॥ भ्रूसंज्ञया। भ्रू
भंगसूचनेनैव। मर्मरः शुष्कपर्णध्वनिः सोऽस्यास्तीति आर्द्रादि ज्ञितं॥ श्वश्रूपदेनानुल्लंघनीयाज्ञत्वं॥
एवं च दत्तमपि न गृह्यते। तत्र कावार्त्ता न्यस्त्वास्येति व्यज्यते। मर्मरशंकयेत्यनेन किंचित्कालं करावस्था
नेऽभस्यैव स्यादिति ध्वन्यते। श्वासत्यागाभावोपि एतेन च्छन्नकामुकविषयत्वं ध्वन्यते। यातु देवरप
त्न्याः सुहृत्समुदायस्य च क्वचित्सिप्रत्युत्तरं दीयते किंतु श्वासो न मुच्यते॥ यतो वह्निः क्रूरः स्यात् सुहृ
त्स्वेदनप्रत्युत्तरदानस्यावश्यकता अन्यं प्रतिप्रत्युत्तरासाकां ध्वन्यते। श्वासत्यागाभावेपि
तासां दाहभीत्या निखिलेन परपुरुषविरहगोपनं व्यज्यते॥४२॥ विरहविदितं विरहज्ञापितमित्यर्थः॥

न्तः प्रेममानसंभ्रमः। यदीयमेवं विरहवतीतर्हि मय्यतीतिमत्प्रेमज्ञातोस्त्यर्थः। द्वारदेशोपविष्टा बहूनां दर्श
१५५२ नेके न चित्तस्थायमपि निवेदनीयमिति धियेति भावः। पुरयोषिदित्यनेन वास्तवैकनिष्ठप्रेमशून्यत्वं॥
४३॥ ननु अन्यकालीनतथाविधागमनेन खंडितात्वं न स्यादत आह। उपलक्षणमिति। इदमुपलक्षणं प्र
तीतिरित्युपपत्तेरपि अन्यसंभोगदुःखितायाः परांगनासंगजन्यमानवत्याः खंडितायाश्च भेदश्चिंत्यः॥
अस्फुटेति। कोपजबाष्परुद्धकंठतया गद्गदध्वनं। चिंतातद्दोषगवेषणे चित्तैकाग्र्यं॥ वक्षः किम्चिति॥ वास्त
वान्यनायिकाकुचाभोगचिह्नाज्ञानात्पृच्छति॥ किमपि किंचिदीषत् प्रभुमिच्छंत्याः ननु दृष्टत्वत्याः लज्ज
येति भावः। किमपीत्यनेनास्फुटत्वाभिनयनमित्येकवचनेन चिह्नं वचनासत्त्वैकरूपतां ध्वनयति॥
४४॥ वक्षोजेति॥ दयितपदं स्वनिरूपितप्रेमवतः ईदृशानुचितचरणकर्तृतया दुःखातिशयं ध्वनय
ति॥ चिह्नितपदं गाढालिंगनं। दीर्घं निश्वसितीति। लज्जावशादिति भावः। नजल्पतिवक्रोक्त्याजुवा॥ ना
यकस्य दुःखसंभावनयेति भावः। तेन समानलज्जाभिमदनत्वं॥ किंच जलकरणेक वदनमार्जने
न बाष्पांबुतिरोदधाति नेतदश्रुजलं किंतु वदनपरिमार्जनजलमिति गोपनं करोतीति भावः॥
विप्रियकारिणं प्रति तज्जनितदुःखप्रदर्शनं नायिका विप्रियकारितैव स्यादिति चातुर्येणेति भावः॥४५॥

मामिति। उत्तानरतकरणात् विपक्षेतिसुदृशः पादांगुलीलक्तकैरालिप्तान नंमामुद्वीक्ष्य नम्रीकृतमुखी सा चित्रा

र्पितेवाभवद्। विप्रियकारिणोदर्शनापेक्षया दर्शनमेव वरमिति बुध्या नम्रमुखत्वं॥ विषादमूढतया चित्रसा

१४ प दृश्यं। अलिप्तपदेन गोपनायोग्यत्वं व्यज्यते। नम्रमुखकरणेन किंमदधिकापि साऽयेनायं तस्यामासक्त इति के २

सांगनिरीक्षणं। चित्रार्पिते त्यनेन निर्गतप्राणतुल्यता ध्वन्यते॥ रूक्षं कठोरं नोक्तवक्तवती। नानोपायैरा

राधितापि यदि एतादृशः तदा कठोरवाक्यादिभर्त्सितः किं वा न करिष्यतीति बुध्यतेति भावः। अनेनास्फु

टालापः दर्शितः। निःश्वासकोष्णे दुःखबाष्पैः किंचिदुष्णे न हसितवती। अनेन संतापः उष्णत्वेन रक्तताल

क्ष्यते। इत्याकूतं। आदर्शमिति। त्वमीदृश इति किमर्थं वाच्यं आदर्शं दृष्ट्वा स्वापराधं ज्ञास्यतीति धियेति भा

वः। प्रातः पदेन तद्दर्शनस्य मांगलिकतया अवश्यकर्तव्यं व्यज्यते। ५८। कांतमिति। तयेति। नामग्र

हणमपि परकीयैव। आलिंगनविशेषेण कंकणांकितकंठत्वं कांतं स्पृहणीयं। तेन तत्कृतान्यसंगस्य १४

दुःसहत्वं परकीया अन्यजनकीया तेन प्रच्छन्नकामिनीत्वं व्यज्यते। परुषाः निष्ठुराः दूतीमुखे

इति। अस्यार्द्धस्य आत्मदौरात्म्यस्य फलवैचित्र्यमेतद्धि लोकयस्वेति भावः त्वमेवैनमनुरागधीति

धादूरादिसनेनदूतीमुखा लोकनेपिस्ती तिः तत्र किंवाच्यं कांतं प्रतीति प्रच्छन्नकामुकाभिलाषित्वं व्यज्यते॥४७॥ दूर
स्तवेति। तवेत्यनादरः दूरमिति गोपना नर्हिता। कुतो मेक्षमा। त्वदीयेतादृशापराधसहनेइति भावः इति इत्यु
क्ता। अंगीकृतत्वेनावश्यदेयता। बसुपदेन त्यागानर्हिता। प्रचलचेतसः चंचलचेतसः अत्रागमन प्रतिज्ञां
कृत्वान्यत्र गमनेन चंचलता। तेनत्वाग्रेदर्शनाभावसंभावनयासद्योङ्ग्यहणयोग्यता ध्वन्यते॥ कणत् ग्रहणस ग्र४
मयेस्वकंकणशब्देन सशब्दं यथा भवतितथा नायकरतलात् कर्णीक कंकणमाकृष्यतेइत्यर्थः॥४८॥ पतिमवमन्ये
ति। स्वकृतपत्यवमानोत्तर परितापवत्त्वमित्यर्थः। भ्रांतिः मिथ्यामतिः संतापोनुतापः। संमोहइंद्रियवैक
ल्यं। अनुनयतीति। लज्जमाना नवोढापतिं कलहेनावमानितं नानुनयति नसांत्वयति। सखीजनायनापि
कथयति। अत्रापिलज्जमानेत्यन्वेति। सखीसमूहमध्ये नैकामपि हृद्गतमकथयदितिलज्जातिशयो ध्वन्य
ते॥ भयसंबंधेनसौगंध्यं। अनिलपदेनानिवारणीयता। शून्यं प्रतिपत्तिशून्यं। अंतः अंतकरणे॥४९॥ रहितं
विरमतीति। निवेद्यदुःखंसुखी भवतीतिन्यायात्। एवंचावश्यकथनीयताद्योत्यते॥ कापिदुर्निवारा॥
अधार्य्येनेति भावः। इतिहेतौ अधोमुखी लज्जावशात्। अत्रमध्यात्वंस्फुटमेव॥५०॥ कापिपरितापव

१५ शास्त्रवादीन्याह। अकरोरिति। हे नेत्र किमिति शोणिमानमकरोः कुपितप्रसादनानैपुण्येपि आरुण्यप्रदर्शनेन को
पोत्पादनमनुचितमितिव्यंग्यं॥ करपद्म तर्जनं वेति पाठः हे करपद्म करणकर्जनं अर्थान्नायकस्य किमिति त्वय
काधीः हे रसज्ञे जिह्वे कुधाकलहं किमन्वथाः कृतवती। रसानभिज्ञनेत्रकराभ्यां तथाकरणेपि रसज्ञायास्तव
सर्वथेदमनुचितमितिभावः। किंच नेत्रारुण्यादेस्तथा नयनसंभवेपि त्वदुक्तस्य न कोपि समाधानोपाय इति भा
वः। तत्रार्थांतरन्यासमाह। हितमिति। यत्तु कापि सखी नायिकां वदति॥ हे रसज्ञे किमिति नेत्रयोः शोणिमान
मकरोरित्यादि व्याचक्षते तन्न। नायिकायाः परितापादर्शनेन लक्षणासंगतेः॥५॥ भर्तुर्यस्येति। मातुरित्य
नेन स्वानुचिताचरणप्रकारः कृता व्यज्यते। यस्यानंदादिभरणकर्तुः कृते गुरुः श्वश्र्वादिर्लघुर्गण्यो धन्निम
गुरूपदेनानुलंघनीयात्वं। तादृशस्याप्यनादरेण तस्मिन्प्रेमातिशयो व्यज्यते। यद्वा। यस्य कृते भर्तुर्गुरुः
श्वशुरः लघुरभूत्। तेन तदनादरकरणेन भर्तुरप्यवमानः कृत एवेति भावः। यद्वा। यत्कृते दूत्यादिर
पि गुरुः कृतः श्वश्र्वादिवदुपासितः सोप्यवधीरित इति। अत्रानुचिताचरणं ममेति व्यज्यते। गोष्ठी सती
सभा कनिष्ठीति अलक्ष्याकृता। एवं च सतीसभाजनिंदापि न गणितेति भावः। यद्वा। यत्र सतीसभायाम
प्यहितेयं अनुचिता भवति तत्रान्यासां का गणनेति। तासां समया निंदा संपादितेति भावः। कोशोर्थसंग्रह

गृहंतन्निष्ठद्रव्यरूपं धैर्यं। गांभीर्यं। यद्वा धीरयति साधीरा तद्भावो विवेकित्वं गतं नष्टं। क्रोशपदेन विपदुपयोगित्वं।
तेन तन्नाशस्याति दुःसहत्वं ध्वन्यते। सहचरी। तेन त्यागानर्हता सा नीतिरपि दूरतः हृता। त्रपात एवन्निर्मु
क्ता त्रपालेनावश्यांगीकरणीयता। तृणपदेनागणनीयता। किं च स्रोतस्विनी प्रवृद्धस्तत्स्रोतो युक्ता अग
धजलापि नदी बिंदुवपरिच्छिन्ना। स्रोतस्वत्तयानुल्लंघनीयत्वं। बिंदुपदेन त्वरीलोल्लंघनीयत्वं। सोपिय
दर्थमेवं साहसं कृतं सोपीत्यर्थः॥५२॥ यसंकेति। यद्वाग्यसूचकपद्मचिन्हवत्तत्पाणिकमलं। यद्वा
ग्यभवनेन नवमिगुरबृहस्पतिर्भाग्यसूचकः एतत्सर्वेयैः अर्थसंवादि कृतवान्। तादृशेष्वंता नुचितो
पिकोपोयतः सूतः अतो मां धिक्। एवं कोपेकृते पुनर्जीवनमसंतानुचितमित्याह। जीवनमपि धिक्॥ अ
धजीवने पि दृढशौदार्यो भाववति नायकांतरे रतिरसंतानुचितेत्याह। अतनुं कामं धिक्। रतिजनकत्वा
दिति भावः। यद्वा स्वत एवैतादृशादानशीले मम चित्तमाचौपाधिक एवानुरागो नेनोत्सादितो न स्वा
भाविक इत्यतस्तं धिगिति भावः। तनुशून्यत्वादेवेदृशाज्ञानशून्यरतिभावः। तादृशानुरागयोग्ये
तिरस्कारिवेष्टादिकमयुक्तमित्याह॥ धिक्चेष्टितमिति। संकेतस्थलेप्रत्यनवस्थानज्ञानविम
नायमानत्वं लक्षणं। निर्वेदः स्वावमानं। उपालंभः सनिंदपरिभाषणं। चिंता अनागमनहेतुविषया॥५३॥

आलीभिरिति। आलीभिस्तेन विश्वास्यत्वं। बहुत्वेनाप्रतिषेध्यत्वं। अनेककपटैर्योजैः शपथैः समयैः कुं
१६ जोदरं लतागृहमध्यं संकेतितमित्यर्थः। नीतया चार्पितया। तेन मुग्धात्वं। शून्यं प्रियरहितं। विक्षुभितया
विमनस्कया। प्रियविरहचिंताभ्यामिति भावः। प्रियागमनसंभावनया न चलितं। प्रियतमराहित्येन दुः
खदत्वान्नस्थितं। तेन विचारव्याकुलता व्यज्यते। किंतु नवोढया नीरजदृशा। नीरजपदं अश्रुपातं व्यं
जयति। कुंजोपकंठे निकुंजप्रांते। कोपेनस्वाभिलषितोस्या ताम्यंतः व्याकुला येत्र भ्रमरास्तेषां समूहः प्रा
कदंबः तस्य डंबरं आडंबरं आरभटी तियावत्। तस्य चमत्काराः विलासविशेषास्तत्तुल्या दृशाः न्यस्ताः
परितः क्षिप्ताः अत्र व्याकुलत्वेन दुःखितात्वं। भृंगत्वेन श्यामत्वं। कदंबत्वेन निबिडता। डंबरत्वेन कट
क्षेषु प्रौढता। चमत्कारपदेन चित्ताकर्षकत्वं। ईदृशा कपटकारिण्याः सख्या नदृष्टत्वात् इति निकुंजप्रांत १६
मेवावलोकयतीति भावः। यद्वा सखीवंचनेन पलायनार्थं मार्गांतरावलोकनाय तथा पश्यदित्यर्थः।
५४॥ संकेतकेलीति। एत्य। प्रियसंगमेच्छयेति भावः। निभृतं मंदं लज्जयेति भावः। अर्द्धाक्षरं असंपू
र्णाक्षरं। अर्थात्सखीप्रति। तेन तात्कालिकमदनबाधा व्यज्यते। यद्वा। लज्जामदनसाम्यं अर्द्धविका

सिनेत्रं भ्रून्याचेयंदृष्टिः तांबूलमेव। चर्वितमेव। यदर्थं तांबूलचर्वणादिशृंगाररसः च नास एवात्र नास्तीति धि
ति२ यातथैव स्थितेति भावः एवं च प्रियविरहाज्जडतां आपन्नेति ध्वन्यते ॥५४॥ शून्यमिति ॥ शून्यत्वेनानवलोकनी
यता व्यज्यते। चेतोभुवं तेनानिवारणीयता कुटिलं पीडाजनकं तेन दुःसहत्वं दूतीनानिवेदिता। प्रियानर्नार्थे
नज्ञा पिता। दृष्ट्वा प्रियवृत्तांतमिति शेषः किमतः परं विधेयमिति ॥ वा। दूतीनिवेदनसखीप्रश्नकालमध्ये
क्रूरकामशराघातैर्मरणमेवस्यादिति तदनादृत्य मदनविरोधिमहेश्वरस्तुतिमारब्धेति तेन विरहकात
रता व्यज्यते। त्र्यंबकोत्रांकेरस्यादि। सुखाधारहस्तवतः सुखजनकस्य तद्धीनेन कोप्यायास इति व्यज्यते। यद्व
नकेवलं करे एव मस्तकेपि। आस्तादृक्कोपीत्याह। चंद्रशेखरेति। चंदि आह्लादे। आस्तां सुखं दुःखह
रणं तु त्वदधीनमित्याह। हरेति। हरति दुःखमिति हरः नन्वेतदस्य कथमेवंगतं तत्राह। श्रीकंठेति॥
सकल लोकसंहारककालकूटगिलनेनैतादृवधृतमिति भावः ननु तद्दूरीकरणे सामग्री नास्ती
ति तत्राह। शूलिन्निति। ननु तव हृदयहरणेन मम दुःखं स्यादत आह। शिवेति॥ कल्याणस्वरूपस्य न
कुतश्चिद्दुःखमस्तीति भावः। यद्वा। चंद्रशेखरत्वेनेन कामामित्रस्य तस्य तदधीनत्वेन दुःखनिवारणो
पायः सुकर इति ॥ यद्वा ॥ चंद्राद्युद्दीपनेनैव कामः पीडयतीति तस्य तदधीनत्वेन तज्जन्यपीडाहरणेन त

कामनाशेपितव सुकरइत्याह। हेहरेइति। स्मरंहरतीतिभावः। एवंचमूलोच्छेदनकरणेमेवोचितमितिव्यज्य
१७ ते। श्रीकंठेत्यनेनसकललोकानुग्रहाययथाविषंपीतंतथाविरहिहंतृमदननाशोपिकर्तुंयुक्तइति। ननु
पूर्वंहतस्यापिपुनर्जीवनात्तन्नाशोव्यर्थोऽत आह। मूलमिति। इदानींमूलेनतथाजहि यथानपुनर्जीवेदि
तिभावः। भर्गस्तुत्या कामोनपीडयिष्यतीतितत्स्तुतिः॥५६॥ इत्थंभुजंगेति। धैर्यरूपोभुजंगः धैर्यंभुजंगःधै
र्यत्वेनत्यानेंगीकृता॥ भुजंगत्वेनक्रूरता। मूर्द्धेत्यनेनसाहसातिशयः। समुदितेन प्रियतमसंगममग्न
चित्तताध्वन्यते। एवंलज्जारूपांनदींलज्जासहितांनदीमितिवा॥ घनंनिबिडंयदंधकारपटलंघनैर्मेघैर्वा
यदंधकारपटलं। एवंचतथाप्तीतिकालेदेशोतत्स्यस्थानेनसाहसातिशयः। खलांधकारपटलमितिपाठे
धकारसदृशाःखलाःगमनादिप्रतिबंधकत्वात्॥ खलाअंधकारपटलंचेतिवा॥ एवंदुष्टगणानापिनहृतेति
भावः। नदृष्टः संकेतस्थानेइतिभावः। पयोधरेगर्जतीत्यनेनोद्दीपनातिशयेनसंतापातिशयोध्वन्यते॥
मेघेतादृशतादृशमहिषभ्रांत्यात्रासातिशयः। तेनविरहातिशयः। क्रोधाक्रांतत्वेनदुःसहता। कृतांतत्वेन १७
सर्वविनाशकता। मत्तत्वेनानिवारणीयता॥ कृतांतारूढत्वेनान्याप्रतिकरणीयताच॥५७॥ कपटेति॥
गोष्ठीसमूहरसिकत्वेनवंचकत्वेनायोग्यता॥ गोष्ठीत्यनेननतस्यावंचकताचातुर्यातिशयः। चंचलभ्रमरारा

र॰ऋ॰

ववि क्षिप्ते चक्षुषी येन तादृशः। कलचतुरकामिजनवञ्चनानिनिपुणापि केनापि चतुरतारितेति विस्मयात् हासः॥
५८॥ अरतिर्द्वेषः। अंगानां स्थिरं गमोटनं। कपटरुदितं लज्जादिना क्रियाविषयकं व्याजं कपटं तेन रुदितं॥
स्वावस्थाकथनं। कालहृतस्वसंतापविशेषकथनं। पश्चान्नापीति। प्रियतमेन तदागमने दुःखातिशयो भविष्यं। अद्यापि
समयसमुदय एतावकालमित्यर्थः॥ अनागमनरूपेण हेतुना अनुमीयते। परामिति। अपेदे। रसस्थमिति शेषः।
इत्थं। एवंजातीयप्रकरणे। सखीनयस्यां। तेन प्रश्नाहता॥ तादृश्या अपि प्रश्नाकरणेन लज्जातिशयः दीर्घश्वा
संनकरोति। सखीभियेति भावः। चकितं भीतिश्चं चलं नेत्रे क्षतेत्त यैवेति भावः॥ विचारपूर्णतयेति भावः इत्यन्ये।
धत्तेइति॥ विरहवशादिति भावः। अत्र पक्वपांडुरपदयोरन्यतरस्यानर्थक्यमाभाति॥ ५९॥ आनेतुमिति॥
प्रियमिति शेषः। प्रियसखी सैवा नयनप्रयत्नवत्वं द्योतयतीति। किमु न गता का का गतैवेत्यर्थः। मार्गप्रतिबंधान्ना
गतस्तत्राह। भुजगाद्भीतः। किमु। अत्रापि का का न भीत इत्यर्थः। तथाविधपौरुषशालिनो भीत्यसंभवादि
ति भावः। ननु कोपोक्तिवशादेवनागतस्तत्राह। कुपितेति॥ कुपितः किमु न कुपित इत्यर्थः॥ रसासिद्धस्य
न स्यात् सक्तिमतस्तस्य वाञ्छामात्रेण न कोपि कोपइति भावः। विप्रलब्धेप्यसौ नन्दागमनेकारणाभावान्नागतस्तत्राह॥
प्राणेश्वर इति। किम सौ प्राणेश्वरो नापितु प्राणेश्वर ईश्वर एवेति भावः। विप्रलब्धेप्यसाविश्येनेन प्राक्तनासंतसे

×५ लोके श्वेतत्वजातिकथनार्थं तदितिकेचित्। तत्र। पतिरहितायाः क
×पोलसाम्येनैव श्वेतत्वजातस्यव धारणात्॥ ६

र॰ प्र॰ २ र॰ प्र॰

प्रोगोध्वन्यते। प्राणेश्वरपदेनावश्यंप्राणदुःखनिवारकत्वंध्वन्यते। यद्वा॥ किंप्रतिषेधवाचिकुत्सिततद्वचने। असौप्राणे
१८ श्वरः किंकुद्धोवर्त्ततेकाक्वानवर्त्ततेरसर्थः प्राणेश्वरपदेनप्राणापराधएवक्रोधोयुक्तोनतूदासीनासमीचीनवच
सिइतिव्यज्यते। एवमग्नागमनाभावेपितच्चिंतातिशयंध्वनयति। नवोढनीरजमुखी। नवाचासौकुढंनीरजंतंयत्क
मलंतत्सदृशमुखीचेतिकर्मधारयः। कुढपदेनचिरभूतत्वेनकुष्टत्वं। नवेत्यनेनमदनवत्तयाचिंतायायोग्यत्वं॥
नीरजत्वंसुकुमारतामावेदयति। श्रोत्रावतंसीकृतशोभनसुवर्णकेतककुसुमरजःपातजन्यपीडानिपातात्
